# .. Krishna stotra Narayana from brahmavaivartapurANa ..

## ॥ श्रीकृष्णस्तोत्रं ब्रह्मवैवर्तपुराणे नारायणकृतम् ॥

Document Information

Text title : nArAyaNakRitaM shrIkRiShNastotra brahmavaivarta-purANe
File name : krishnastotranArAyaNaBVP.itx
Location : doc_vishhnu
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : Dinesh Agarwal dinesh.garghouse at gmail.com
Proofread by : Dinesh Agarwal dinesh.garghouse at gmail.com
Description-comments : brahmavaivartapurANa brahmakhaNDam adhyAya 3 shloka 10-17
Latest update : January 19, 2013
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ श्रीकृष्णस्तोत्रं ब्रह्मवैवर्तपुराणे नारायणकृतम् ॥

नारायण उवाच ।

वरं वरेण्यं वरदं वरार्हं वरकारणम् ।
कारणं कारणानां च कर्म तत्कर्मकारणम् ॥ १॥

तपस्तत्फलदं शश्वत्तपस्वीशं च तापसम् ।
वन्दे नवघनश्यामं स्वात्मारामं मनोहरम् ॥ २॥

निष्कामं कामरूपं च कामघ्नं कामकारणम् ।
सर्वं सर्वेश्वरं सर्वबीजरूपमनुत्तमम् ॥ ३॥

वेदरूपं वेदबीजं वेदोक्तफलदं फलम् ।
वेदज्ञं तद्विधानं च सर्ववेदविदां वरम् ॥ ४॥

इत्युक्त्वा भक्तियुक्तश्च स उवास तदाज्ञया ।
रत्नसिंहासने रम्ये पुरतः परमात्मनः ॥ ५॥

नारायणकृतं स्तोत्रं यः पठेत्सुसमाहितः ।
त्रिसंध्यं यः पठेन्नित्यं पापं तस्य न विद्यते ॥ ६॥

पुत्रार्थी लभते पुत्रं भार्यार्थी लभते प्रियाम् ।
भ्रष्टराज्यो लभेद्राज्यं धनं भ्रष्टधनो लभेत् ॥ ७॥

कारागारे विपद्ग्रस्तः स्तोत्रेनानेन मुच्यते ।
रोगात्प्रमुच्यते रोगी वर्षं श्रुत्वा च संयतः ॥ ८॥

इति ब्रह्मावैवर्ते नारायणकृतं श्रीकृष्णस्तोत्रम् ।

---

brahmavaivartapurANa brahmakhaNDam adhyAya 3 shloka 10-17

Encoded and proofread by Dinesh Agarwal dinesh.garghouse at gmail.com

.. Krishna stotra Narayana from brahmavaivartapurANa ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*